Hanuman Langulastra Stotram

The powerful lAngUlAstra stotra (the tail which is the weapon) invokes Hanuman in his form as vIrAnjaneya. One should worship the deity in a vigraha made of rakta-chandana, using red flowers and other upachAras. Then the sAdhaka should recite the Stava once, thrice, seven or twenty-one times sitting under an ashvattha tree. This process is repeated for forty-eight days while keeping the vow of strict celibacy. By doing thus, all enemies of the sAdhaka are mitigated by the grace of mAruti. Without indriya-nigraha, undertaking such practices can prove to be dangerous.

ध्यानम्

श्रीमन्तं हनुमन्तमार्तरिपुभिद्भूभृत्तटभ्राजितं
चाल्पद्वालधिबन्धवैरिनिचयं चामीकराद्रिप्रभम्।
अग्र्यं रक्तपिशङ्गनेत्रनलिनं भ्रूभङ्गभङ्गस्फुरत्
प्रोद्यच्चण्डमयूखमण्डलमुखं दुःखापहं दुःखिनाम्॥

कौपीनकटिसूत्रमौञ्ज्यजिनयुग्देहं विदेहात्मजा-
प्राणाधीशपदारविन्दनिरतं स्वान्तः कृतान्तं द्विषाम्।
ध्यात्वैवं समराङ्गणस्थितमथानीय स्वहृत्पङ्कजे
संपूज्याखिलपूजनोक्तविधिना संप्रार्थयेदर्चितम्॥

हनुमन्नञ्जनीसूनो महाबलपराक्रम।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ १॥

मर्कटाधिप मार्तण्डमण्डलग्रासकारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ २॥

अक्षक्षपण पिङ्गाक्ष दितिजासुक्षयङ्कर।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ३॥

रुद्रावतार संसारदुःखभारापहारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ४॥

श्रीरामचरणाम्भोजमधुपायितमानस।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ५॥

वालिप्रमथनक्लान्तसुग्रीवोन्मोचनप्रभो।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ६॥

सीताविरहवाराशिभग्न सीतेशतारक।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ७॥

रक्षोराजप्रतापाग्निदह्यमानजगद्वन।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय॥ ८॥

ग्रस्ताशेषजगत्स्वास्थ्य राक्षसाम्बोधिमन्दर ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ ९ ॥

पुच्छगुच्छस्फुरद्वीर जगद्दग्धारिपत्तन ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १० ॥

जगन्मनोदुरुल्लंघ्यापारावारविलङ्घन ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ ११ ॥

स्मृतमात्रसमस्तेष्टपूरक प्रणतप्रिय ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १२ ॥

रात्रिञ्चरतमोरात्रिकृन्तनैकविकर्तन ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १३ ॥

जानक्या जानकीजानेः प्रेमपात्र परंतप ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १४ ॥

भीमादिकमहाभीमवीरावेशावतारक ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १५ ॥

वैदेहीविरहक्लान्तरामरोषैकविग्रह ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १६ ॥

वज्राङ्गनखदंष्ट्रेश वज्रिवज्रावगुण्ठन ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १७ ॥

अखर्वगर्वगन्धर्वपर्वतोद्भेदनस्वर ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १८ ॥

लक्ष्मणप्राणसन्त्राण त्राततीक्ष्णकरान्वय ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ १९ ॥

रामादिविप्रयोगार्तभरताद्यार्तिनाशन ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ २० ॥

द्रोणाचलसमुत्क्षेपसमुत्क्षिप्तारिवैभव ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ २१ ॥

सीताशीर्वादसंपन्न समस्तावयवाक्षत ।
लोलल्लाङ्गूलपातेन ममारातीन्निपातय ॥ २२ ॥

इत्येवमश्वत्थतलोपविष्टः
शत्रुञ्जयं नाम पठेत् स्वयं यः ।
स शीघ्रमेवास्तसमस्तशत्रुः
प्रमोदते मारुतजप्रसादात् ॥ २३ ॥

dhyānam

śrīmantaṃ hanumantamārtaripubhidbhūbhṛttaṭabhrājitaṃ
cālpadvāladhibandhavairinicayaṃ cāmīkarādriprabham |
agryaṃ raktapiśaṅganetranalinaṃ bhrūbhaṅgabhaṅgsphurat
prodyaccaṇḍamayūkhamaṇḍalamukhaṃ duḥkhāpahaṃ
duḥkhinām ||

kaupīnakaṭisūtramaunjyajinayugdehaṃ videhātmajā-
prāṇādhīśapadāravindaniratam svāntaḥ kṛtāntaṃ dviṣām |
dhyātvaivaṃ samarāṅgaṇasthitamathānīya svahṛtpaṅkaje
saṃpūjyākhilapūjanoktavidhinā saṃprārthayedarcitam ||

hanumannanjanīsūno mahābalaparākrama |
lolallāṅgūlapātena mamārātīnnipātaya || 1 ||

markaṭādhipa mārtāṇḍamaṇḍalagrāsakāraka |
lolallāṅgūlapātena mamārātīnnipātaya || 2 ||

akṣakṣapaṇa piṅgākṣa ditijāsukṣayaṅkara |
lolallāṅgūlapātena mamārātīnnipātaya || 3 ||

rudrāvatāra saṃsāraduḥkhabhārāpahāraka |
lolallāṅgūlapātena mamārātīnnipātaya || 4 ||

śrīrāmacaraṇāmbhojamadhupāyitamānasa |
lolallāṅgūlapātena mamārātīnnipātaya || 5 ||

vālipramathanaklāntasugrīvonmocanaprabho |
lolallāṅgūlapātena mamārātīnnipātaya || 6 ||

sītāvirahavārāśibhagna sīteśatāraka |
lolallāṅgūlapātena mamārātīnnipātaya || 7 ||

rakṣorājapratāpāgnidahyamānajagadvana |
lolallāṅgūlapātena mamārātīnnipātaya || 8 ||

grastāśeṣajagatsvāsthya rākṣasāmbodhimandara |
lolallāṅgūlapātena mamārātīnnipātaya || 9 ||

pucchagucchasphuradvīra jagaddagdhāripattana |
lolallāṅgūlapātena mamārātīnnipātaya || 10 ||

jaganmanodurullaṃghyāpārāvāravilaṅghana |
lolallāṅgūlapātena mamārātīnnipātaya || 11 ||

smṛtamātrasamasteṣṭapūraka praṇatapriya |
lolallāṅgūlapātena mamārātīnnipātaya || 12 ||

rātrincaratamorātrikṛntanaikavikartana |
lolallāṅgūlapātena mamārātīnnipātaya || 13 ||

jānakyā jānakījāneḥ premapātra paraṃtapa |
lolallāṅgūlapātena mamārātīnnipātaya || 14 ||

bhīmādikamahābhīmavīrāveśāvatāraka |
lolallāṅgūlapātena mamārātīnnipātaya || 15 ||

vaidehīvirahaklāntarāmaroṣaikavigraha |
lolallāṅgūlapātena mamārātīnnipātaya || 16 ||

vajrāṅganakhadaṃṣṭreśa vajrivajrāvaguṇṭhana |
lolallāṅgūlapātena mamārātīnnipātaya || 17 ||

akharvagarvagandharvaparvatodbhedanasvara |
lolallāṅgūlapātena mamārātīnnipātaya || 18 ||

lakṣmaṇaprāṇasantrāṇa trātatīkṣṇakarānvaya |
lolallāṅgūlapātena mamārātīnnipātaya || 19 ||

rāmādiviprayogārtabharatādyārtināśana |
lolallāṅgūlapātena mamārātīnnipātaya || 20 ||

droṇācalasamutkṣepasamutkṣiptārivaibhava |
lolallāṅgūlapātena mamārātīnnipātaya || 21 ||

sītāśīrvādasaṃpanna samastāvayavākṣata |
lolallāṅgūlapātena mamārātīnnipātaya || 22 ||

ityevamaśvatthatalopaviṣṭaḥ
śatrunjayaṃ nāma paṭhet svayaṃ yaḥ |
sa śīghramevāstasamastaśatruḥ
pramodate mārutajaprasādāt || 23 ||

www.kamakotimandali.com